# प्रास्ताविकम्

❁ ॐ ❁

पञ्चविंशतेः वर्षेभ्यः पूर्वं 1981 तमे वर्षे जूनमासे बेंग्लूरूस्थ-हिन्दुसेवाप्रतिष्ठानस्य संस्कृत-विभागमाध्यमेन संस्कृतसम्भाषणान्दोलनस्य आरम्भः अभवत्। एतदान्दोलनम् आधारीकृत्य एव संस्कृतार्थं कार्यं कुर्वतीनां सर्वासामपि व्यक्तीनां संस्थानां च मध्ये सम्बन्धकल्पनाय संस्कृतकार्ये एकसूत्रताम् आनेतुं च 'संस्कृत भारती' संस्था 1995 तमे वर्षे घटिता।

संस्कृतभाषां व्यवहारभाषां कृत्वा तन्माध्यमेन सामाजिकपरिवर्त्तनम् आनेतव्यम् इति उद्देश्येन प्रचाल्यमानम् एतदान्दोलनम् अद्य देशस्य सर्वेषु अपि प्रान्तेषु तथा विदेशेष्वपि व्याप्नुवत् अस्ति। यद्यपि संस्कृत-संभाषण-सम्बन्धि-कार्यक्रमाः एतस्य आन्दोलनस्य आधारभूताः सन्ति तथापि संस्कृतस्य राष्ट्रस्य च सर्वतोमुखविकासाय संस्कृत-शिक्षाक्षेत्रे परिवर्त्तनं, लोकानां संस्कृतशिक्षणं, पठन-पाठन-साहित्यनिर्माणं, शास्त्रसंरक्षणं, वेदशिक्षणं शोधश्च, ताडग्रन्थानां सङ्ग्रहः प्रकाशनं च संस्कृत-विज्ञान-अनुसन्धानम्-इत्येवं प्रकारेण बहुमुखिकार्याणि महता प्रमाणेन सम्प्रति प्रचलन्ति।

एतस्मिन् क्रमे एव चतुष्पथे, बसस्थानके, रेलस्थानके, विपण्यां मन्दिरसम्मुखे वा वीथीजनैः यथा अवगम्येत तथा सरलसंस्कृतेन 'जागरूको भव' इति वीथीनाटकम् एतया (संस्कृतभारती) संस्थया प्रकाशितं विद्यते। एतेन अर्धघण्टाभ्यन्तरे जनाः संस्कृतस्य आस्वादनं कर्त्तुं शक्नुवन्ति। जनसमीपं संस्कृतं नेतुम् अयम् उत्तमः उपायः।

विद्यार्थिनः वीथीनाटकमाध्यमेन नूतननाट्यविधया परिचिताः भवेयुः, सरलसंस्कृतभाषया व्यवहारप्रयोगं जानीयुः, तथा आधुनिकसमाजे स्वार्थपरायणजनेभ्यः आत्मानं समाजं च संरक्षितुं जागरूकाः स्युः इत्येवं समुद्दिश्य माध्यमिक-शिक्षा-मण्डलेन कनिष्ठोपाध्याय-कक्षायाः पाठ्यक्रमे सन्निविष्टं वीथीनाटकमिदं नूनं स्वोद्देश्यपूर्तौ साफल्यमवाप्स्यति इति विश्वासः।

**संयोजकः**
डॉ. सतीश कपूरः
भूतपूर्व व्याख्याता
श्रीदिगम्बर-जैन-आचार्य-संस्कृत-महाविद्यालयः,सांगानेर-जयपुरम्।

## नाट्य-प्रयोजनम्-

आचार्यभरतेन नाट्यशास्त्रे नाट्यस्य नैकानि प्रयोजनानि परिगणितानि सन्ति।
यथा-

**उत्तमाधममध्यानां नराणां कर्मसंश्रयम्।**
**हितोपदेशजननं धृतिक्रीडासुखादिकृत्ङ्क**
**दुःखार्त्तानां श्रमार्त्तानां शोकार्त्तानां तपस्विनाम्।**
**विश्रान्तिजननं काले नाट्यमेतद् भविष्यतिङ्क**
**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।**
**लोकोपदशेजननं नाट्यमेतद् भविष्यतिङ्क**

विविधरुचीनां विविधस्वभावानां च जनानां कृते नाट्यं कर्मप्रेरकस्वरूपं भवति, क्रियाशक्तिम्

उत्साहं च ददाति इत्याशयः। उत्तमो वा मध्यमो वा अधमो वा इति वैविध्ये सत्यपि सर्वेषामपि रुचिकारणं भवति। नाट्यं नाम वेदरूपेणाऽपि अभिमन्यते - पञ्चमो वेद इति। अस्मिन् च अन्यवेदेषु इव शूद्राणां कृते निषेधः नास्ति। अर्थात् जातिबन्धन-निरपेक्षभावेन नाट्यं सर्वेषाम् आनन्दम् उद्वहति। 'उत्तमाऽधममध्यानाम्' इत्यस्य अयमेव अभिप्रायः।

सर्वेषां लोक-जनानां कल्याणसम्पत्तये प्रेरणाऽपि नाट्यात् सुलभा। धैर्यवृत्तौ, क्रीडावत् सुखास्वाद-प्राप्तौ चापि नाट्यस्य महती भूमिका वर्त्तते। दुःखसन्तप्तानां, श्रमश्रान्तानां, शोकाभिभूतानां च जनानां कृतेऽपि नाट्यं विश्रामपदं सौख्यदायकं च भवति। तपस्विनोऽपि नाट्येन सौख्यमनुभवितुमर्हन्ति। नाट्यं हि नाम धर्मप्रदायकं, धर्मानुकूलं, यशोवर्धकम्, आयुर्वर्धकं, बोधशक्तिवर्धकं, कल्याणप्रदं, लोकोपदेशकारकं च भवति। नाट्यस्य महिमानम् उद्दिश्य आचार्यभरतेन अन्यदपि प्रोक्तं यत्-

**न तज्ज्ञानं न तच्छिल्पं न सा विद्या न सा कला।**
**न स योगो न तत्कर्म नाट्येऽस्मिन् यन्न विद्यते॥** इति॥

सर्वमपि अत्र विराजते नाट्ये। कालिदासेनाऽपि सारसर्वस्वरूपेण उक्तं यत्-

**'नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्'॥** इति॥

इत्थं नाट्यस्य उपयोगिता वा महत्ता वा सुतरां स्पष्टीभवति।

## नाटकस्य स्वरूपम्

नाटकस्वरूप-चर्चायां सर्वप्रथमम् इदम् अवधेयं विद्यते यद् आधुनिके समये यस्मिन् सन्दर्भे वयं 'नाटकम्' इति पदस्य प्रयोगं कुर्मः,-तदर्थं शास्त्रे 'नाट्यम्' इति 'रूपकम्' इति वा पदं प्रयुक्तम् आचार्यवर्यैः। वस्तुतः रूपकस्य, नाट्यस्य वा प्रथमभेदः 'नाटकम्' निगद्यते, सम्भवतः प्रथमभेदस्य प्रधानताम् अनुचिन्त्य तदेव पदं (नाटकमिति) सामान्यरूपेण रूपकसन्दर्भे प्रयोक्तुम् अस्माकं प्रवृत्तिः सञ्जाता इति अनुमीयते। रूपकस्य दश भेदाः इमे परिगणिताः सन्ति यथा-

**नाटकं सप्रकरणं, भाणः प्रहसनं डिमः।**
**व्यायोगसमवकारौ, वीथ्यङ्केहामृगा इति॥** इति दशरूपकम्

अपि च

**नाटकमथ प्रकरणं भाणव्यायोगसमवकारडिमाः।**
**ईहामृगाङ्कवीथ्यः प्रहसनमिति रूपकाणि दश॥** इति साहित्यदर्पणः॥

एतत्परिगणनस्य अयम् आशयो वर्त्तते यत् शास्त्रीयभूमौ नाटक-पदं रूपकभेदरूपेण प्रवर्त्तते, सामान्ये लोकव्यवहारे च रूपकस्य पर्यायवाचकरूपेण प्रवर्त्तते। यद्वा नाटकम् इत्येव पदम् अधिकं प्रसिद्धं विद्यते रूपक-पदाऽपेक्षया। यत्किमपि स्यात् परन्तु रूपकस्थाने नाट्यस्थाने वा नाटकपदस्य प्रयोगो विवादयोग्यो विषयो नास्ति इति मन्यामहे, रूढेः बलवत्त्वाद् इति। अस्तु तावत्। दृश्यकाव्यं, श्रव्यकाव्यं चेति काव्यस्य भेदद्वयं विद्यते। तत्र दर्शनीयत्वात् दृश्यकाव्यं स्वीक्रियते, श्रवणीयत्वात् च श्रव्यकाव्यम् अङ्गीक्रियते। श्रवणं तु दृश्यकाव्येऽपि भवति तर्हि उभयोः को नाम भेदविशेषः? अत्र इदं तथ्यं वर्त्तते यत् दृश्यकाव्यं प्रधानतया दर्शनविषयीक्रियते, दर्शनं च नाम चक्षुर्विषयो भवति इति स्पष्टमेव। तस्मात् श्रवणे सत्यपि दृश्यकाव्यम् इति नामकरणं सङ्गतं भवति। श्रव्यकाव्ये च श्रवणं वा पठनं वा इति सर्वमपि शब्दमात्रस्य विषयः तिष्ठति। श्रवणयोग्यम् एव श्रव्यकाव्यं भवति, पठनयोग्यं काव्यं श्रव्यकाव्यं न भवति- इति तदपि न चिन्तनीयम्। यतो हि श्रवणं वा, पठनं वा, लेखनं वा, वाचनं वा सर्वत्र शब्दविषयता विराजते। अन्तः वा बहिः वा (मनसि वा

वचसि वा) शब्दः श्रोत्रेणैव गृह्यते इति निश्चितम्। श्रोत्रवृत्तिः च श्रवणमेव। अतः दृश्यादतिरिक्तं काव्यं श्रव्यकाव्यम् इत्यभिधीयते। दृश्यकाव्ये च श्रवणाऽतिरिक्तं दर्शनम् अपि प्रसज्जते अतः दृश्यकाव्यम् इत्यभिधीयते। अत्र दृश्यकाव्यस्यैव प्रसङ्गः प्रवृत्तः खलु चर्चायाम्।

अभिनययोग्यं काव्यं दृश्यकाव्यं भवति, तद्यथा- 'दृश्यं तत्राऽभिनेयम्' इति। अभिनये च नटादिषु भिन्नभिन्नरूपाणाम् आरोपः रूपणक्रिया च नटनम् इति कथ्यते अतः नटितुं नाटयितुं वा योग्यं नाट्यम् इत्यपि निगद्यते। अभिनयकरणे अनुकरणात्मकः क्रीडातुल्यव्यवहारः प्रवर्त्तते अत एव दृश्यकाव्यं 'क्रीडनीयकम्' इत्यपि उच्यते। मुनिना भरतेन नाट्यशास्त्रे एतदेव पदं बाहुल्येन प्रयुक्तम्। नाट्ये अभिनयप्रधानता भवति, अभिनये च अनुकरणप्रधानता प्रवर्त्तते, अनुकरणं च अवस्थाविशेषस्य एव विधीयते। अत एव धनञ्जयेन दशरूपके उक्तम्-

**'अवस्थाऽनुकृतिर्नाट्यम्'** इति।

एतम् एव अभिप्रायं विश्वनाथः साहित्यदर्पणे प्रकटयति यत्-

**'भवेदभिनयोऽवस्थाऽनुकारः स चतुर्विधः'** इति

अनुकारो नाम अनुकृतिः- अनुकरणम् इत्यर्थः।

अभिनयः चतुर्विधः यथा-

**'आङ्गिको वाचिकश्चैवमाहार्यः सात्त्विकस्तथा'** इति

**आङ्गिकः अभिनयः**- अङ्गैः क्रियमाणः अभिनयः आङ्गिकः कथ्यते, हस्तचरणादिसञ्चालनरूपः इति।

**वाचिकः अभिनयः**- वाचा, वचनैः विधीयमानः अभिनयः वाचिकः उच्यते।

**आहार्यः अभिनयः**- वेश-भूषादिभिः विधीयमानः अभिनयः आहार्यः कथ्यते।

**सात्त्विकः अभिनयः**- स्वेद-रोमाञ्चादिभिः भावैः विधीयमानः अभिनयः सात्त्विकः उच्यते।

☆ ☆ ☆

## नाटकस्य (नाट्यस्य) उद्भवो विकासश्च-

नाटकस्य उद्भवादिविषये नैकाः कथाः प्रवर्त्तन्ते भारतवर्षेऽस्मिन्। आचार्यभरतविरचितस्य नाट्यशास्त्रस्य प्रथमेऽध्याये च प्राचीनतमा कथा उपलभ्यते नाटकोत्पत्ति-विषयिणी यत् लोकजनान् अतिमात्रं खिद्यमानान् अवलोक्य इन्द्रप्रमुखाः देवाः ब्रह्मदेवम् उपगत्य अभिनव-वेद-संरचनार्थं प्रार्थयामासुः। स्त्रीशूद्रादीनां हि वेदेऽधिकारः नासीत्, तस्मात् तेषामपि अधिकारयोग्यः कश्चिद् वेदः मनोविनोदार्थम् अपेक्षितः आसीत्। देवानां तां प्रार्थनां श्रुत्वा ब्रह्मा चतुरो वेदान् अनुध्यायन् पञ्चमवेदं नाट्यवेद-नामानं विरचयाञ्चक्रे। ऋग्वेदात् पाठ्यं, सामवेदात् गीतकं, यजुर्वेदाद् अभिनयम्, अथर्ववेदाच्च रसान् आदाय खल्वयं नाट्यवेदो ब्रह्मणा विरचितः। यथा-

**जग्राह पाठ्यमृग्वेदात् सामभ्यो गीतमेव च।**
**यजुर्वेदादभिनयान्, रसानाथर्वणादपि** इति

नाट्यवेदं विरचय्य ब्रह्मा देवतासु तत्प्रचारार्थम् इन्द्रम आदिशत्। परन्तु इन्द्रः नाट्यकर्मणि देवतानाम् अकौशलं ब्रह्मणे न्यवेदयत्। एतदपि च उवाच यत् वेदज्ञानमर्मज्ञाः मुनिजनाः नाट्यवेदस्य ग्रहणे सम्प्रयोगे च

समर्थाः वर्त्तन्त इति। अतो ब्रह्मणः आदेशमनुसरन् मुनिः भरतः स्वपुत्रेभ्यो नाट्यवेद-शिक्षां प्रदत्तवान्। नाट्यवेद-प्रयोगः भारतीवृत्तौ सरस्वतीवृत्तौ आरभटीवृत्तौ च प्रारब्धः। अनन्तरं च शृङ्गारप्रधाना कैशिकीवृत्तिरपि समायोजिता। किन्तु स्त्रीपात्रं विना कैशिकीवृत्तौ नाट्यप्रयोगः कर्तुम् न शक्यते स्म , अत एव अप्सरसाम् उपकल्पना अनुविहिता। इत्थं सर्वविधसाधनैः सम्पन्नो मुनिभरतो ब्रह्माणमुपगत्य प्रत्यग्रप्रयोग-विषये पृष्टवान्। ब्रह्मणो निर्देशानुसारं च इन्द्रस्य ध्वजोत्सवे नाट्यवेदस्य सर्वप्रथमः प्रयोगः सम्पादितः। अमुं प्रयोगं सम्प्रेक्ष्य (विलोक्य) सुतरां प्रसन्नाः देवताः पात्रेभ्यो विविधान् उपहारान् पारितोषिकरूपेण प्रदत्तवन्तः। 'इन्द्र-विजयः' इति नाट्यप्रयोगस्य विषयो बभूव। प्रयोगेऽस्मिन् खलु देवानाम् उत्कर्षं दैत्यानाम् च अपकर्षं वीक्ष्य नितरां क्रुद्धाः दैत्याः विघ्नान् उपस्थापयितुम् आरेभिरे। इन्द्रश्च ध्वजेन सकलान् अपि विघ्नान् जर्जरीचकार। तस्मात् किल इन्द्रध्वजः जर्जरनाम्ना प्रसिद्धिं ययौ। ततः इन्द्रदेवो विघ्नानाम् अपवारणाय तेभ्यः परित्राणाय च नाट्यगृहं नाट्यप्रयोगादिरक्षायै स्वयं ब्रह्मा तत्र देवस्थापनां च चकार। दैत्यान् सम्बोधयता च ब्रह्मणा उक्तं यत्- नाट्यवेदोऽयं देवेभ्यो दैत्येभ्यः चेति उभयेभ्यो विद्यते इति। अस्मिन् वेदे धर्मो, हास्यं, क्रीडा, युद्धं, विद्या, कला, योगः कर्म चेत्यादयो विद्यन्ते। नाट्यं हि नाम त्रैलोक्यस्य भावाऽनुकीर्त्तनं वर्त्तते इति। इत्थं बहुधा बोध्यमानाः दैत्याः शान्तिं प्रापुः, नाट्यप्रयोगश्च निर्विघ्नं सम्पन्नो बभूव। नाट्यस्य प्रथमप्रयोगे 'त्रिपुरदाह-नामकः डिमः (नाट्यभेदः), समुद्रमन्थननामकश्च समवकारः (नाट्यभेदः) आसीत्। इत्थं खलु नाट्यपरम्परायाः सूत्रपातः प्रवृत्तः। नाट्यस्य उद्भवविकासादि-विषये इयमपि अवधारणा विद्यते यद् वेदगतानि संवाद-सूक्तानि एव नाट्यबीजरूपाणि सन्ति। ऋग्वेदे नैकानि तादृशानि सूक्तानि वर्त्तन्ते येषु हि अनेके वक्तारः सन्ति। तान्येव संवादसूक्तनाम्ना व्यवह्रियन्ते। एषु वक्तॄणां वचनप्रतिवचनात्मको व्यवहारो दृश्यते। महाकवि-कालिदासविरचितस्य 'विक्रमोर्वशीयम्' इति नाटकस्य आधारभूतः संवादः ऋग्वेदीयः एवास्ति। संवादसूक्तानि इमानि साक्षान्नाट्यरूपाणि तु न सन्ति, परम् एतेषु नाट्यकलायाः बीजानि अन्तर्निहितानि वर्त्तन्ते इति विद्वांसः अनुमन्यन्ते। कालान्तरे च एतान्येव नाट्यकलाबीजानि अङ्कुरीभूय नाट्यविकासपरम्परां प्रवर्त्तितवन्ति। पाश्चात्त्याः मनीषिणः अस्मिन् विषये स्वस्वमतानि वितन्वन्ति तद्यथा-

1. जर्मनदेशीयो विद्वान् डॉ. श्रोदर् मन्यते यत् संवादसूक्तानाम् अभिनयो गीतनृत्यादिसहितः क्रियते स्म। एतानि सूक्तानि वस्तुतो धार्मिकनाटकानि एव सन्ति। यज्ञविशिष्टेषु अवसरेषु नृत्यगीतैः वाद्यादिभिः विविधैः उपकरणैः च सह याज्ञिकाः एतानि अभिनयन्ति स्म इति। अद्यत्वे वङ्गप्रदेशे प्रचलिताः धार्मिकयात्राः खलु धार्मिकनाटकानामेव विकासरूपाः सन्ति।

2. डॉ. हर्टल् मन्यते यत् संवादसूक्तानि इमानि गीयन्ते स्म, गानार्थं च अनेके (एकाधिकाः) जनाः नियुज्यन्ते स्म। यतो हि संवाद-प्रदर्शने एकलो जनः प्रायशः न क्षमते। अनेकैः जनैः क्रियमाणं संवाद-प्रदर्शनम् एव नाट्यरूपतां प्राप्नोति तस्माद् एतानि संवादसूक्तान्येव नाट्यबीजानि सन्ति इति।

3. डॉ. कीथ् अस्मिन् विषये मतभेदम् आतनोति। संवादसूक्तानि ऋग्वेदे उपलभ्यन्ते, एषां च शंसनमात्रं (कथनमात्रं पाठनमात्रं वा) भवति स्म। गानप्रयोगस्तु सामवेदस्य विषयः। अत एव उभयोः भेदो विद्यते। सामगायनः ऋत्विग् 'उद्गाता' निगद्यते, ऋङ्मन्त्रोच्चारणकर्त्ता च ऋत्विक् होता उच्यते। विविधानि खलु संवादसूक्तानि विद्यन्ते क्वचित् इतिहासवृत्तान्तः इति। तथापि नाट्यबीजानि सूक्तान्तर्गतानि स्वीकर्त्तुं शक्यन्ते इति।

4. डॉ. विण्डिश्, आल्डेनबर्ग, पिशेल् चेति मुख्याः जर्मनदेशीयाः विद्वांसः किल संवादसूक्तानां स्वरूपवर्णनम् अन्यथैव प्रतिपादयन्ति। ते विमृशन्ति यत् पुरा संवादसूक्तानि गद्यात्मकानि आसन्। तत्र रोचकत्वात्

रमणीयत्वात् च सूक्तानां पद्यभाग एवाऽवशिष्टः, वर्णनमात्रत्वाच्च शनैः शनैः गद्यभागोऽवलुप्तः। एतत्सर्वम् आख्याननाम्ना व्यवह्रियते। नाट्यविधौ प्रयुज्यमानं गद्यपद्यसम्मिश्रणं किल संवादसूक्तानामेव अनुकरणजन्यं विद्यते इति पिशेल्महोदयस्य विचारः। डॉ. आल्डेनबर्गमहोदयः तु ऐतरेयब्राह्मणस्य 'शुनः शेप-' उपाख्यानं, शतपथब्राह्मणस्य 'पुरूरव-उर्वशी' कथां च एषाम् आख्यानानाम् एव अवशिष्टरूपेण स्वीकरोति।

इत्थं नाट्यानाम् उद्भवविकासपरम्पराविषये नैकानि मतानि प्रसिध्यन्ति। यत्किमपि स्यात्- परन्तु नाट्यस्य प्रभावात्मकतायाः रोचकतायाः, सौख्यप्रदायकतायाश्च विषये मनागपि सन्देहो नास्ति।

## वीथीनाटक-परिचयः

यद्यपि नाट्यस्य रूपकस्य वा दशसु भेदेषु वीथीभेदोऽपि अन्यतमः परिगणितः, तथापि प्रस्तुतप्रसङ्गे सोऽयं नाट्यभेदो न विवक्षितः। रूपकस्य दश भेदाः इमे खलु- 1. नाटकम् 2. प्रकरणम् 3. भाणः 4. व्यायोगः 5. समवकारः 6. डिमः 7. ईहामृगः 8. अङ्कः 9. वीथी 1. प्रहसनं चेति। अत्र नाटकमिति वीथी इति च द्वयमपि रूपकभेदरूपेण निर्दिश्यते। तस्माद् वीथीनाटकम् इति पदं व्यामिश्रम् इव प्रतीयते। अतः वीथी-इति पदं नाटकस्य प्रवृत्तिपरिचायकम् अवगन्तव्यं न तु भेदरूपम्। नाटक-पदं चापि रूपकसामान्येऽर्थे प्रयुक्तं ग्रहणीयम्। वीथी नाम मार्गः सरणिः वा। वीथीषु वीथीषु गत्वा अभिनीयते, प्रदर्श्यते तन्नाटकम् इति वीथीनाटकम्। वीथीपदमपि लाक्षणिकं ग्रहणीयम्  अर्थात् लक्ष्यार्थे प्रयुज्यमानम् अवबोधनीयम्। कोऽयं लक्ष्याऽर्थः तर्हि? जन-जन-पर्यन्तम् इति, अथवा विविध-जन-पर्यन्तम्, अपि वा सर्वविधपर्यन्तम् इति लक्ष्यार्थः। लक्ष्यार्थे किं प्रयोजनं तावत्? न केवलं रङ्गमञ्च-मात्र-सीमितं स्यात् प्रत्युत निर्धनधनाढ्य-सर्वविधजनेभ्यः उपलब्धं स्यात् इति प्रयोजनम्। विशिष्य गत्वा जनाः पश्येयुः न वेति संशयः, किन्तु सहजं स्वयमुपलभ्यमानं च द्रक्ष्यन्ति, प्रेक्षिष्यन्ते इति प्रयोजनम्। प्रेक्ष्य च तदन्तर्निहितं सन्देशमुपदेशं वा अनुशीलयिष्यन्ति इति प्रयोजनम्। अनुशील्य च यथायथं यथाकथञ्चिद् वा आत्मसात्करिष्यन्ति, चरितार्थयिष्यन्ति इति प्रयोजनम्। कूपः खलु स्वयं तृषितम् उपगच्छति इति महत् फलम्। प्रस्तुतसन्दर्भे यद्वा आधुनिकसन्दर्भे वीथीनाटकस्य अयम् एव अर्थोऽभिप्रायो वा स्वीक्रियते। एतत्कृते हिन्दी-पदं 'नुक्कड़नाटक' इति प्रयुज्यते।

शास्त्रनिर्दिष्टस्य वीथीभेदस्य स्वरूपं तावत् प्रस्तुतसन्दर्शात् सुतरां पृथग् वर्त्तते। तद् यथोक्तं साहित्यदर्पणे-

**वीथ्यामेको भवेदङ्कः कश्चिदेकोऽत्र  कल्प्यते।**
**आकाशभाषितैरुक्तैश्चित्रां प्रत्युक्तिमाश्रितःङ्क**
**सूचयेद् भूरिशृङ्गारं किञ्चिदन्यान् रसान् प्रति।**
**मुखनिर्वहणे सन्धी अर्थप्रकृतयोऽखिलाःङ्क**
**अस्यास्त्रयोदशाङ्गानि निर्दिशन्ति मनीषिणः।**
**उद्घात्यकावलगिते प्रपञ्चस्त्रिगतं छलम्ङ्क**
**वाक्केल्यधिबले गण्डमवस्यन्दितनालिके।**
**असत्प्रलापव्याहारमार्दवानि च तानि तुङ्क** इतिङ्क

अयमर्थो यद् वीथीनाट्ये एकः एव अङ्कः प्रयुज्यते। उत्तमो मध्यमः अधमो वा कश्चिद् एको नायकः कल्प्यते। आकाशभाषितैः विचित्राः उक्तयः प्रत्युक्तयः च वीथ्यां प्रयुज्यन्ते। अस्यां शृङ्गाररसस्य

बाहुल्यं भवति। शृङ्गाररसस्य बाहुल्यात् च कैशिकीवृत्तिः अपि वीथीनाट्ये प्रयुज्यते। इत्थं विविधलक्षणैः समन्वितं वीथीनाट्य-स्वरूपं शास्त्रे निर्दिष्टं वर्त्तते। एतानि लक्षणानि उद्दिश्य प्रस्तुतं वीथीनाटकं न विरचितम्, अतः अस्य प्रस्तुतस्य वीथीनाटकस्य (जागरूको भव इत्यस्य) शास्त्रीयपृष्ठभूमिः नास्ति इति निर्णयः। वीथीनाटकप्रयोगः अथवा 'वीथीनाटकम्' इति पदप्रयोगः सुतराम् अभिनवः आधुनिकश्च विद्यते। परन्तु एतादृशस्य प्रयोगस्याऽपि बीजरूपं तु संवादसूक्तेष्वेव सम्भावयितुं शक्यते इति मन्यामहे। आधुनिकयुगे 'संवाद-पदस्य' महती भूमिका विद्यते। भावादिसम्प्रेषणता, यद्वा जनजनपर्यन्तं भावसम्प्रेषणम् अपि संवादपदेन अभिव्यज्यते। एतदेव तात्पर्यं पाश्चात्याः सामूहिक-संवाद रूपेण स्वीकुर्वन्ति। रूपकस्य, उपरूपकस्य वा इदं नव्यं स्वरूपं (वीथीनाटकमिति) निःसन्दिग्धं महाप्रभावजनकं विद्यते, जन-चेतना-जागरणाय च कल्पतेतराम्।

## कथावस्तु-परिचयः

एकवाक्येन वदामश्चेत् 'जागरूको भव' इति वीथीनाटकम् आधुनिकराजनीतेः कूट-कुटिलपक्षं जन-जनसमक्षम् उद्घाटयति। राजनीतेः अस्मिन् द्विजिह्वकुटिले पक्षे व्यङ्ग्यबाणैः प्रहरन् कश्चिद् आह अपि-

**उपमितनचिकेताः शुद्धचेता विनेता,**
**अहमहमिति कृत्वा विप्रलम्भैर्विजेता।**
**तदनु च परमात्मानन्दकन्दस्तटस्थो,**
**जयति, जयति चैवं राजनीतिव्यवस्थाङ्क** इतिङ्क

लोकतन्त्रस्य गुणगानं बहुधा बहुभिः बहुत्र क्रियते, श्रूयते, गृह्यते च परन्तु तत्र स्वार्थपरायणाः नेतारः पदलब्धये स्वार्थसिद्धये च मनोमोहक-वचनरचना-चातुरीं प्रयुञ्जानाः कथं कथमिव मायाजालं विरचय्य मुग्धजनतां सम्भ्रमयन्ति, वञ्चयन्ति चेति निदर्शनं वीथीनाटकेऽस्मिन्नुपलभ्यते। अन्ते च नाटकेऽस्मिन् जनतां प्रति सततजागरूकतायाः सन्देशः सम्प्रेषितः। स सन्देश एव नाटकस्याऽस्य नामकरणमपि बिभर्त्ति- 'जागरूको भव' इति।

अस्मिन् वीथीनाटके कश्चिद् अधिस्नातकः किन्तु उद्योगहीनः युवकः गिरीशनामा विद्यते यः खलु पितुः (कर्मठरायस्य) परिचितं मित्रं देवीप्रसादनामकम् उपगत्य आत्मने उद्योगम् अपेक्षते। सर्वमपि परिचयम् उपेक्ष्य देवीप्रसादः उद्योगप्रदाननिमित्तम् उत्कोचधनं याचते, परन्तु गिरीशः तावद् धनं दातुं नितराम् असमर्थः बहुधा अनुनयविनयम् आचरति। अस्मिन्नेवाऽन्तरे मध्यकालीन-निर्वाचनस्य समाचारं (वार्त्ताम्) अधिगत्य देवीप्रसादो गिरीशं प्रचारकार्यार्थं कथयति। प्रचारकर्मणि च तं प्रेरयितुं सामवचनैः सन्तोषयति, आत्मीयतां प्रदर्शयन् च उद्योगोपलब्धि-प्रलोभनम् अपि ददाति। वराको गिरीशश्च अनिच्छन्नपि विवशो वशंवद इव देवीप्रसादस्य वचनजाले निपतति, प्रचारकर्म च स्वीकरोति।

निर्वाचनसङ्ग्रामे उभयोः राजनेत्रोः पक्षादिनामकरणमपि रुचिकरं वर्त्तते। तद्यथा दुर्बुद्धि-पक्षः, मण्डूकरायः अभ्यर्थी, निर्वाचनचिह्नं च - कपिः इति। अपरत्र च - निर्बुद्धिपक्षः, कूष्माण्डरायः अभ्यर्थी, निर्वाचनचिह्नं च गर्दभः इति। देवीप्रसादः किल कूष्माण्डरायस्य समर्थनम् आतनोति तस्यैव च प्रचारार्थं गिरीशं नियोजयति। एवं प्रचारे-प्रसारे च प्रवृत्ते परिणामतः कूष्माण्डरायो विजयी उद्घोष्यते, मन्त्रिपदं च अधितिष्ठति। मन्त्रिपदं प्राप्य कूष्माण्डरायः स्वार्थकल्याणमात्रपरायणः सन्तिष्ठते, प्राक्कृतानि जनकल्याण-सङ्कल्पवचनानि च तृणमपि न मन्यते। सम्माननादि-कार्यक्रमेषु तु गृद्ध्र इव लोलुपः सहर्षं स्वीकृतिं प्रददाति

आत्मनः। स्वार्थसाधकसमितेः तिमिङ्गिलाचार्यस्य च महत्साहाय्यं सम्पादयति।

निर्वाचनादिकोलाहले शान्ते, मन्त्रिपदम् अधिष्ठिते सति च कूष्माण्डराये गिरीशः आगत्य आत्मने उद्योगप्रदानविषयं पुनः प्रस्तौति। कूष्माण्डरायेण कृतं सङ्कल्पं च स्मारयति किन्तु हन्त! सोऽयं मन्त्रीभूतः तम् (गिरीशं) सर्वथा अवहेलयति, उपेक्षते च। सम्पन्नायां स्वार्थसिद्धौ इदानीं गिरीशं तिरस्कारवचनैः योजयति। गिरीशः पुनः पुनः प्रार्थनाम् अनुनयं च करोति, परं मन्त्री कूष्माण्डरायस्तु सरोषं पादप्रहारेण तं प्रताडयति। इत्थं प्रणुन्नो गिरीशः न्यक्कृतः ग्लानिपरिणामतः क्रुद्ध-क्रुद्धः सम्यग् भर्त्सयति, तर्जयति, रोषं चातनोति। मन्त्री तम् अवहेल्य स्वकीय-सम्मानन-स्थलं प्रति प्रस्थानं करोति।

इतो गिरीशो जनतासमक्षे मन्त्रिणां कौटिल्यम् उद्घाटयति। जनसमवायं च सह नीत्वा सम्मानन-कार्यक्रम-स्थलं प्राप्नोति, तत्रैव मन्त्रिणः कूष्माण्डरायस्य वास्तविकतां प्रकटयति। सर्वेऽपि प्रेरिताः जनाः तस्मिन्नेव स्थले मन्त्रिणः ताडनं कुर्वन्ति।

अवसाने गिरीशः जनतां प्रति जागरूकतायाः सन्देशं व्याहरति भूयो भूयः- 'जागरूको भव' इति।

☆ ☆ ☆

# जागरूको भव
## (वीथीनाटकम्)

### पात्र-परिचयः

| | |
|---|---|
| 1. **नाटककार** | :- सूत्रधारवत् नाटकप्रस्तावनायाः कर्त्ता। |
| 2. **लौकिक** | :- प्रस्तावनायां जिज्ञासुः सहायकश्च। |
| 3. **कर्मठराय** | :- कश्चिद् गृहस्थः (परिवारमुख्यः।) |
| 4. **गिरीश** | :- कर्मठरायस्य पुत्रः, एम. ए.उत्तीर्णः स्वर्णपदकप्राप्तश्च। |
| 5. **रमेश** | :- कर्मठरायस्य मित्रम्। |
| 6. **वितारक** | :- उपाहारमन्दिरस्य परिचारकः । |
| 7. **देवीप्रसाद** | :- सचिवसहायकः, राजकीयव्यवहारनिपुणः (कर्मठरायस्य बाल्यमित्रम्) |
| 8. **कूष्माण्डराय** | :- मन्त्री, दुर्बुद्धिपक्षस्य विजेता नेता। |
| 9. **अर्चक** | :- देवालयस्य आराधकः (पुजारी)। |
| 1. **सहकारी** | - अर्चकस्य सहकर्मी। |
| 11. **तिमिङ्गिलाचार्य** | :- स्वार्थसाधकसमित्याः अध्यक्षः। |
| 12. **धनङ्गिलाचार्य** | :- स्वार्थसाधकसमित्याः कार्यदर्शी। |

# जागरूको भव
## ( वीथीनाटकम् )

**प्रथम-दृश्यम्**

**नाटककारः**- आगच्छन्तु, आगच्छन्तु। वीथीनाटकम् आगच्छन्तु।

**( कोलाहलः )**

**लौकिकः- ( मध्ये आगत्य )** किं भोः, कः एषः भवतां कोलाहलः? उच्चस्वरेण किं वदन्तः सन्ति भवन्तः?

**नाटककारः**- आगच्छन्तु, आगच्छन्तु, संस्कृतेन वीथीनाटकम् अस्ति। सर्वे आगच्छन्तु।

**लौकिकः**- किम्? वीथीनाटकं वा? तदपि संस्कृतेन? गच्छतु रे, संस्कृतनाटकं को वा ज्ञातुं शक्नुयात्?

**नाटककारः**- तथा नास्ति भोः। नाटकं सरलभाषया भवति। सर्वेषाम् अर्थबोधः भवति। भवान् अपि आगच्छतु।

**लौकिकः**- एवं वा? अस्तु तर्हि। अहमपि आगच्छामि। गच्छाम तावत्। (जनान् उद्दिश्य) पश्यन्तु भोः, संस्कृतेन एते नाटकम् अभिनयन्ति इति श्रूयते। सरलतया सर्वेषां बोधः यथा स्यात् तथा अभिनयन्ति इति श्रूयते। पश्याम तावत्।

**नाटककारः**- आगच्छन्तु ------- आगच्छन्तु--------

☆ ☆ ☆

**द्वितीय-दृश्यम्**

(रायः आगच्छति।) (नटनायकः गीतं गापयति। सर्वे नटाः गीतं गायन्ति। तदनुगुणं रायः अभिनयति।)

**(गीतम्)**

**रायः गृहमागतः।**

**अहो श्रान्तः! अहो श्रान्तः!**<br>
**कार्यमहो कार्यं कार्यालये,**<br>
**वेतनमल्पम्, आयः न्यूनः,**<br>
**कुटुम्बभरणं बहुकष्टं,**<br>
**दिनमनुदिनमपि वर्धते मूल्यं,**<br>
**पत्नीपुत्राः इच्छन्ति बहु बहु,**<br>
**तण्डुलमानय, शाकम् आनय,**<br>
**तैलम् आनय, क्षीरम् आनय,**<br>
**पुस्तकमानय, लेखनीमानय,**<br>
**अत्यावश्यकवस्तूनि आनय,**<br>
**वराकः एषः कुप्यति, खिद्यते,**<br>
**पुनरपि क्रुध्यति, अन्ते रोदिति,**<br>
**कष्टमहो कष्टम्**<br>
**कष्टम् अकटकटाऽऽकष्टम् अकटकटाऽऽ**

**रायः**- नलिनि! नलिनि! (द्वारशब्दं करोति।) (द्वारोद्घाटनस्य अभिनयः)

**गिरीशः**- अहो, पितः! आगच्छतु।

**रायः**- गिरीश! भवतः माता कुत्र गतवती?

**गिरीशः**- कुत्रापि संस्कृतनाटकम् अस्ति इति गतवती।

**रायः**- कदा आगच्छति सा?

**गिरीशः**- अहं किं जानामि?

**रायः**- अस्तु, गिरीश, बुभुक्षा भवति। पाकशालायां किम् अस्ति इति पश्यतु। किञ्चित् काफी करोतु।

**गिरीशः**- अस्तु, पश्यामि। (अन्तः गत्वा आगत्य) पितः! एतत् स्वीकरोतु। (काफी-चषकं ददाति।)

**रायः**- (पीत्वा) किमिदं काफी वा? उष्णजलं वा?

**गिरीशः**- अहं किं करोमि? गृहे शर्करा नास्ति। काफीचूर्णं नास्ति। क्षीरमपि नास्ति। कथं काफी करोमि?

**रायः**- प्रतिदिनम् एवमेव। सर्वदा नास्ति----नास्ति----नास्ति---- नास्ति----।

**गिरीशः**- यदि भवान् यथेष्टम् आनयति तर्हि नास्ति इति किमर्थं वदामः?

**रायः**- अस्तु, किं किं नास्ति इति वदतु। सर्वम् आनयामि।

**गिरीशः**- शृणोतु, शर्करा नास्ति, गुडः नास्ति, तण्डुलः नास्ति, तैलं नास्ति, दालः नास्ति,शाकः नास्ति, मृत्तैलं नास्ति-------

**रायः**- अये, अलम् इतोऽपि अधिककथनेन। (शिरोवेदनाम् अभिनयन्) तर्हि किम् अस्ति? तद् वदतु।

**गिरीशः**- अहम् एकः अस्मि। भवान् एकः अस्ति, तावदेव।

**रायः**- हूँ, (खेदम् अनुभूय) अस्तु, स्यूतम् आनयतु। सर्वाणि वस्तूनि आनयामि। (गिरीशः स्यूतम् आनीय ददाति) गिरीश! एकः विषयः! अद्य भवतः सन्दर्शनम् आसीत् किल? किं जातम्?

**गिरीशः**- तत् किं भवति? यः धनं ददाति सः उद्योगं प्राप्नोति। यस्य 'इन्फ्लुयेन्स्' अस्ति सः अपि उद्योगं प्राप्नोति।

**रायः**- तर्हि भवान् एवं करोतु। देवीप्रसादः इति एकः मम स्नेहितः अस्ति। सः राजकीये व्यवहारे अतीव निपुणः अस्ति। प्रभावी पुरुषः च। भवान् तं पश्यतु, मम नाम वदतु। उद्योगः लभ्यते एव।

**गिरीशः**- अस्तु, इदानीमेव गच्छामि।

**रायः**- अहम् आपणं गच्छामि।

☆ ☆ ☆

## तृतीय-दृश्यम्

(मार्गः- रायः गच्छन् अस्ति। मित्रं रमेशः अभिमुखम् आगच्छति।)

**रायः**- हरिः ओं, रमेश!

**रमेशः**- हरिः ओं! किं भोः, दर्शनमेव नास्ति?

**रायः**- अहम् अन्यत्र गतवान् आसम्। सर्वं कुशलं वा? (अग्रे दृष्ट्वा) आगच्छतु भोः। अत्रैव उपाहारमन्दिरम् अस्ति। काफी पिबाम।

(उपाहारमन्दिरप्रवेशम् अभिनीय आसने उपविश्य)

**रमेशः**- अयेऽऽ कः अस्ति?

**वितारकः**- किम् आवश्यकम्?

**रमेशः**- किं किम् अस्ति?

**वितारकः**- इड्ली, क्वथितं, पृथुकाः, उपमा, बन्स्, पूरिका, वडा, केसरीबात्-----

**रमेशः**- किमपि मास्तु। अर्धार्धं काफी ददातु।

**वितारकः**- (स्वगतं) वराकाः! सर्वं पृच्छन्ति। अनन्तरम् अर्धार्धं काफी इति वदन्ति। (अन्तर्भागम् अभिलक्ष्य उच्चस्वरेण) अर्धार्धं काफी ---- (काफी आनीय स्थापयति।)

**रायः**- किं भोः, अत्र आगच्छतु।

**वितारकः**- किम्?

**रायः**- एतत् किम्?

**वितारकः**- चषकः।

**रायः**- चषके किम् अस्ति?

**वितारकः**- चषके काफी अस्ति।

**रमेशः**- (कोपेन) काफीमध्ये किम् अस्ति?

**वितारकः**- अहो, मक्षिका वा? तत्र किमस्ति? बहिः क्षिपतु। पिबतु।

**रायः**- तथा कर्तुं न शक्यते। अन्यत्? ददातु।

**वितारकः**- तर्हि अहम् एव मक्षिकाम् उन्नीय क्षिपामि। (तथा करोति) इदानीं पिबतु।

**रायः**- रे, अन्यत् आनीय ददातु। कीदृशम् उपाहारमन्दिरं भवताम्? काफीमध्ये अपि मक्षिकाः।

**वितारकः**- (जनान् उद्दिश्य) पश्यन्तु भोः, एकरूप्यकात्मके काफीपानीये, ऋते मक्षिकायाः, किं गजम् आनीय स्थापयेम वा? (स्वगतम्) हुं वराकाः!!

**रायः**- किं रे, भवान् अन्यत् काफी आनीय ददाति वा न वा?

**वितारकः**- अन्यत् दातुं न शक्यते। आवश्यकं चेत् एतत् पिबतु, नो चेत् गच्छतु।

**रायः**- एवं वा? तर्हि अहं स्वास्थ्यविभागाधिकारिणः समीपं गत्वा वदिष्यामि।

**वितारकः**- वदतु रे, किं तेन? सः आगत्य किं वा कुर्यात्? यदा सः आगच्छति तदा मसालादोसां स्पेषल् काफी च दद्मः चेत् स्वीकृत्य मौनं गच्छति। स्वास्थ्यविभागाधिकारिणः समीपं किं, स्वास्थ्यसचिवस्य समीपं गच्छतु। किं तेन अस्माकम्?

**रायः**- (क्रोधेन) अस्तु, वयम् अपि पश्याम तावत् (मित्रेण सह निर्गच्छति)

☆ ☆ ☆

## चतुर्थ-दृश्यम्

(आसन्दे देवीप्रसादः उपविष्टः अस्ति। गिरीशः प्रविशति।)

**गिरीशः**- हरिः ओं, नमस्कारः।

**देवीप्रसादः**- कः भवान्?

**गिरीशः**- अहं भवतः मित्रस्य पुत्रः।

**देवीप्रसादः**- इदानीम् अहं सचिवस्य साहाय्यकः अस्मि। अतः सर्वे 'भवतः मित्रस्य पुत्रः', 'भवतः मित्रस्य

मित्रम्', 'भवत: मित्रस्य सहोदर: इत्येवं वदन्त: मत्समीपम् आगच्छन्ति।

**गिरीश:**-तथा न श्रीमन्! मम पिता भवत: बाल्यमित्रं------ सहाध्यायी। समाने आसने उपवेशनम् आसीत् भवतो:। 'कर्मठराय:' इति तस्य नाम।

**देवीप्रसाद:**- कर्मठराय:। क: स:? कस्यां कक्ष्यायां स: मम सहाध्यायी आसीत्?

**गिरीश:**- अष्टमकक्ष्यायाम्।

**देवीप्रसाद:**- अष्टमकक्ष्यायाम् अहं त्रीणि वर्षाणि आसम्। स: प्रथमे वर्षे, द्वितीये वर्षे, उत तृतीये वर्षे मम सहाध्यायी आसीत्?

**गिरीश:**- तृतीये वर्षे।

**देवीप्रसाद:**- उन्नत:, कृष्णवर्ण:, विशालनेत्र:-----

**गिरीश:**- आं, स: एव।

**देवीप्रसाद:**- आं स्मृतम्। तस्य पुत्र: वा भवान्? बहु सन्तोष:। भवान् किं करोति?

**गिरीश:**- अहं एम. ए. पठितवान्। सुवर्णपदकमपि प्राप्तवान् इदानीं -----

**देवीप्रसाद:**- उद्योगान्वेषणं करोति। एवं ननु?

**गिरीश:**- आम्?। एक: उद्योग: अस्ति। यदि भवन्त: एकं वचनं वदन्ति---- किञ्चित् 'इन्फ्लुयन्स्' कुर्वन्ति चेत्------ लभ्यते एव।

**देवीप्रसाद:**- पश्यतु गिरीश, तदेकं न शक्यते। इदानीं काञ्चनं विना किमपि न सिध्यति। अहं सत्यं वदामि।

**गिरीश:**- भवान् सत्यहरिश्चन्द्र:।

**देवीप्रसाद:**- तस्य वंशज:। यदि भवान् वित्तकोषे उद्योगम् इच्छति तर्हि पञ्चदशसहस्रं रूप्यकाणि दातव्यानि भवन्ति। आरक्षकनिरीक्षकोद्योग: चेत् २५ सहस्रं रूप्यकाणि।

**गिरीश:**- तर्हि एवं करोतु।

**देवीप्रसाद:**- किम्?

**गिरीश:**- के. एस. आर. टी. सी. मध्ये निर्वाहकोद्योग:----

**देवीप्रसाद:**- तदर्थमपि १० सहस्रं रूप्यकाणि दातव्यानि भवन्ति।

**गिरीश:**- श्रीमन्, अहं निर्धनपुत्र:, निरुद्योगी-----

**देवीप्रसाद:**- पश्यतु गिरीश, इदानीं काल: तादृश: अस्ति। गतसप्ताहे मम कार्यालये एक: सेवक: उद्योगित्वेन स्वीकृत:। तेनैव अष्टसहस्रं रूप्यकाणि दत्तानि। एवं स्थिते----

गिरीश:- श्रीमन्! कृपया किञ्चित्--------

(दूरवाणीध्वनि:)

देवीप्रसाद:- तिष्ठतु। दूरवाणी आगता। (दूरवाण्यां) हरि: ओं----- अहं देवीप्रसाद:। किं ----? मध्यकालीननिर्वाचनं वा? कदा----? आगामिमासे एव वा? अस्तु------ चिन्ता मास्तु-----। अस्माकमेव जय: भवति। --- अस्तु----धन्यवाद:।

देवीप्रसाद:- पश्यतु गिरीश, भवत: एका शुभवार्ता।

गिरीश:- का वार्ता

देवीप्रसाद:- इदानीं मध्यकालीननिर्वाचनं घोषितम् अस्ति। भवान् एवं करोतु। अस्माकं पक्षस्य प्रचारकार्यं

करोतु। भोजनादिकं मम गृहे एव करोतु। निर्वाचनानन्तरम् उद्योगविषये किमपि चिन्तयामः।

**गिरीशः**- तथैव अस्तु।

**देवीप्रसादः**- तर्हि दीक्षां ददामि?

**गिरीशः**- का दीक्षा?

**देवीप्रसादः**- राजकीयदीक्षा।

**गिरीशः**- राजकीयदीक्षा इति काचित् अस्ति वा?

**देवीप्रसादः**- आम्। भवान् सिद्धः वा?

**गिरीशः**- आम्, अहं तु सिद्धः?

**देवीप्रसादः**- तर्हि दीक्षां ददामि। (शिरस्त्रं धारयति)(साभिनयम् उभौ अपि गच्छतः)

☆ ☆ ☆

### पञ्चम-दृश्यम्

शृण्वन्तु भोः, शृण्वन्तु ऽऽऽ-------
भवताम् अमूल्यमतं-दुर्बुद्धिपक्षस्य कृते।
भवताम् अभ्यर्थी-मण्डूकरायः।
तस्य सङ्केतः- कपिसङ्केतः।
शृण्वन्तु भोः शृण्वन्तु-----
भवताम् अमूल्यमतं-कूष्माण्डरायस्य कृते।
तस्य पक्षः- निर्बुद्धिपक्षः।
तस्य सङ्केतः- गर्दभसङ्केतः।

इयम् आकाशवाणी। सम्प्रति वार्ताः श्रूयन्ताम्। ह्यः प्रवृत्ते निर्वाचने निर्बुद्धिपक्षस्य श्री कूष्माण्डरायः- जितवान् अस्ति।---- इति वार्ताः।

(सर्वे अभिमानिनः उत्थाय जयघोषं कुर्वन्ति।) जयतु जयतु कूष्माण्डरायः----- (द्विवारं)

(कूष्माण्डरायः भाषणार्थं सिद्धः अस्ति।)

**देवीप्रसादः**- इदानीम् अस्माकं नायकः श्री कूष्माण्डरायः एकम् अमूल्यं भाषणं करोति।

**कूष्माण्डरायः**- प्रियबान्धवाः! भवतां सर्वेषां सहकारेण अहं जितवान् अस्मि। यद्यपि अहं मन्त्री भवितुं न इच्छामि, तथापि भवतां सेवां कर्तुं मन्त्री अस्मि। भवतां सर्वेषाम् अमूल्यसहकारेण शीघ्रमेव मुख्यमन्त्री अपि भविष्यामि। अनन्तरं सर्वाः समस्याः दूरीकरिष्यामि। चित्रमन्दिराणि स्थापयिष्यामि। तदा सुखस्य शान्तेः च नदी प्रसरिष्यति। अस्माकं राज्यं रामराज्यं करिष्यामि।

☆ ☆ ☆

### षष्ठ-दृश्यम्

(मन्त्री कूष्माण्डरायः उपविष्टः अस्ति। साहाय्यम् इच्छन्तौ अर्चकः तत्सहकारी च आगच्छतः।)

**अर्चकः**- नमस्कारः श्रीमन्!

**कूष्माण्डरायः** - नमस्कारः।

**अर्चकः**- आवां पार्श्वस्थात् शिवपुरग्रामतः आगतवन्तौ।

**सहकारी**- अस्माकं ग्रामे कश्चन देवालयः अस्ति। सः जीर्णः अस्ति।

**कूष्माण्डरायः**- एषः गतसर्वकारस्य दोषः।

**अर्चकः**- तस्य देवालयस्य उद्धारः करणीयः इति अस्माकम् इच्छा।

**कूष्माण्डरायः**- योग्यं कार्यम्। अवश्यं कुर्वन्तु।

**अर्चकः**- तदर्थं किञ्चित् धनसाहाय्यम्----।

**कूष्माण्डरायः**- धनसाहाय्यम्? तत्तु सर्वथा न शक्यते। सर्वकारकोषे इदानीं धनम् एव नास्ति।

**अर्चकः**- किञ्चित् वा साहाय्यम्-----

**कूष्माण्डरायः**- किं सर्वकारकोषे धनवृष्टिः भवति वा? धनसाहाय्यं सर्वथा न शक्यते।

**अर्चकः**- (सहकारिणा सह किञ्चित् समालोच्य) सिमेण्ट्प्राप्त्यर्थम् अनुमतिपत्रं दातुं शक्यते वा?

**कूष्माण्डरायः**- सिमेण्ट्-निमित्तं परमिट्? सर्वथा न शक्यते एतदपि।

**अर्चकः**- (पुनः सहकारिणा सह समालोच्य) अस्तु तर्हि। वयम् एव अस्मत्प्रदेशे धनं सङ्गृह्य जीर्णोद्धारकार्यं करिष्यामः। विग्रहस्य पुनःप्रतिष्ठापनदिने यदि भवन्तः उपस्थिताः स्युः तर्हि उचितं भवेत्।

**कूष्माण्डरायः**- देवीप्रसाद!

**देवीप्रसादः**- (उपस्थाय) श्रीमन्, उपस्थितोऽस्मि।

**कूष्माण्डरायः**- एते मां कार्यक्रमार्थम् आह्वयन्तः सन्ति।

**देवीप्रसादः** - कदा कार्यक्रमः?

**अर्चकः**- माघबहुलचतुर्दश्याम् उत्तमः मुहूर्तः अस्ति। तन्नाम इतः चतुर्णां मासानाम् अनन्तरं मार्चमासे २७ दिनाङ्के।

**देवीप्रसादः**- (कार्यक्रमपुस्तकं दृष्ट्वा) तस्मिन् दिने अवकाशः नास्ति। तद्दिने प्रसिद्धनट्याः हेममालिन्याः सम्माननकार्यक्रमः।

**कूष्माण्डरायः**- तस्मिन् कार्यक्रमे अहम् एव अध्यक्षः। अतः तस्मिन् दिने उपस्थातुं न शक्नोमि। पुनः कदाचित् आगमिष्यामि।

**अर्चकः**- अस्तु तावत् (निर्गच्छतः।)

☆ ☆ ☆

**सप्तम-दृश्यम्**

(कस्याश्चित् शालायाः प्रबन्धकसमित्याः अध्यक्षः कार्यदर्शी च प्रविशतः।)

**अध्यक्षः**- नमस्कारः श्रीमन्!

**कूष्माण्डरायः**- नमस्कारः।

**कार्यदर्शी**- आवां कुचेलपुरात् आगतौ। अस्माकं ग्रामे एका शाला निर्मातव्या इति अस्माकं सङ्कल्पः।

**कूष्माण्डरायः**- विद्यादानं परं दानम्। अवश्यं करणीयं कार्यम् एतत्।

**अध्यक्षः**- शालानिर्माणार्थं सर्वकारतः यदि अनुदानधनं दीयते तर्हि महान् उपकारः स्यात्।

**कूष्माण्डरायः**- गतसर्वकारेण सर्वं धनं व्ययितम्। इदानीं सर्वकारसमीपे धनम् एव नास्ति।

**अध्यक्षः**- जनहितार्थं क्रियमाणं कार्यम् एतत्।

**कूष्माण्डरायः**- तत् समीचीनम्। किन्तु सर्वे आगत्य धनं, धनं, धनम् इति वदन्ति चेत् अहं कुतः वा आनयामि? किं धनपत्रस्य मुद्रणं कुर्यां वा? धनदानं सर्वथा न शक्यते।

**कार्यदर्शी**- तर्हि ५०००गोणीमितं सिमेण्ट् वा----?

**कूष्माण्डरायः**- सिमेण्ट्! मम द्वितीयपत्न्याः चतुर्थपुत्रस्य गृहस्य निर्माणार्थम् अहम् एव कष्टम् अनुभवन् अस्मि। एवं स्थिते सिमेण्ट् कुतः?

**अध्यक्षः**- श्रीमन्, उदाराः भवन्तः-----

**कूष्माण्डरायः**- अस्तु, एतद्विषये एकं प्रार्थनापत्रं लिखित्वा यच्छन्तु। परिशीलयिष्यामः।

**अध्यक्षः**- प्रार्थनापत्रं लिखित्वा आनीतम् एव अस्ति। स्वीकरोतु। (दत्त्वा) किमपि करोतु कृपया।

**कूष्माण्डरायः**- अस्तु, योग्यां व्यवस्थां करिष्यामि।

**अध्यक्षः कार्यदर्शी च**- आवाम् गच्छावः तावत्। (निर्गच्छतः।)

**कूष्माण्डरायः**- देवीप्रसाद! एतस्य पत्रस्य योग्यां व्यवस्थां करोतु। (देवीप्रसादाय ददाति।)

**देवीप्रसादः**- अस्तु, करोमि। (पत्रम् अपठित्वा एव विदार्य क्षिपति।)

☆ ☆ ☆

## अष्टम-दृश्यम्

(धनङ्गिलाचार्यः तिमिङ्गिलाचार्यः च प्रविशतः।)

**तिमिङ्गिलाचार्यः**- (अतिविनयं प्रदर्शयन्) नमस्काराः। नमस्काराः। एषः स्वार्थसाधकसमितेः कार्यदर्शी धनङ्गिलाचार्यः।

**धनङ्गिलाचार्यः**- एषः स्वार्थसाधकसमितेः अध्यक्षः तिमिङ्गिलाचार्यः।

**कूष्माण्डरायः**- भवतोः नाम एव सूचयति यत् मम आत्मीयौ भवन्तौ इति। अपि कुशलं भवतोः?

**तिमिङ्गिलाचार्यः**- आम्, सर्वं भवतः दयया।

**कूष्माण्डरायः**- कः विशेषः?

**तिमिङ्गिलाचार्यः**-भवान् निर्वाचने जितवान् इति वयं सन्तुष्टाः

**कूष्माण्डरायः**- अहम् अपि सन्तुष्टः।

**तिमिङ्गिलाचार्यः**- अस्माकं ग्रामे सर्वे अपि सन्तुष्टाः।

**कूष्माण्डरायः**- मम पत्नीपुत्रादयः अपि सन्तुष्टाः।

**ध.आ.**- भवतः सम्माननं करणीयम् इति वयं निश्चितवन्तः।

**कूष्माण्डरायः**- सम्माननम्! मम सम्माननम्!! कदा क्रियते? देवीप्रसाद! आगच्छतु।

**देवीप्रसादः**- (धावन् आगत्य) उपस्थितोऽस्मि।

**कूष्माण्डरायः**- एतैः मम सम्माननं क्रियते। कार्यक्रमपुस्तके लिखतु।

**देवीप्रसादः**- कदा सम्माननम्?

**ध.आ.**- आगामि-पञ्चमदिनाङ्के।

**देवीप्रसादः**- (कार्यक्रमपुस्तकं दृष्ट्वा) किन्तु श्रीमन्। तस्मिन् दिने भवता कस्याश्चित् शालायाः उद्घाटनम् अङ्गीकृतम् अस्ति।

**कूष्माण्डरायः**- तत् व्याक्षिपतु।

**देवीप्रसादः**- ते अस्माकं पक्षस्य हितं कुर्वन्ति।

**कूष्माण्डरायः**- एते अस्माकं हितं कुर्वन्ति। अतः एतम् एव कार्यक्रमं पुस्तके लिखतु।

**देवीप्रसारदः**- अस्तु, सम्माननं कस्मिन् समये?

**ध.आ.**- सायङ्काले पञ्चवादने।

**कूष्माण्डरायः**- अस्तु, वयं चतुर्वादने एव आगमिष्यामः। भवतां ग्रामे सर्वे कुशलिनः वा?

**ति.आ.**- नैव श्रीमन्। सर्वे चिन्ताक्रान्ताः सन्ति।

**कूष्माण्डरायः**- किमर्थम्?

**ति.आ.**- अस्माकं ग्रामे ५००० जनाः सन्ति।

**ध.आ.**- परन्तु एकमपि चित्रमन्दिरं नास्ति।

**देवीप्रसादः**- पश्यन्तु भोः, सज्जनाः। तस्मिन् ग्रामे ५००० जनाः सन्ति। किन्तु एकमपि चलनचित्रमन्दिरं नास्ति। अहो! कीदृशी दुर्गतिः अस्माकं देशस्य!!

**कूष्माण्डरायः**- बहु अन्याय्यम्। तदर्थं किं कुर्मः?

**ति.आ.**- वयमेव चित्रमन्दिरस्य निर्माणं कुर्मः इति चिन्तितवन्तः।

**कूष्माण्डरायः**- एवं वा? बहु समीचीनम्। निर्माणं कुर्वन्तु। अहमेव उद्घाटनार्थम् आगमिष्यामि।

**ध.आ.**- अस्तु, तथैव कुर्मः। परन्तु इदानीम् अस्माकं पञ्चसहस्रगोणीपरिमितं सिमेण्ट् आवश्यकम् आसीत्।

**कूष्माण्डरायः**- तावदेव वा? इतोऽपि अधिकम् आवश्यकं भवेत्। यथेष्टं स्वीकरोतु ।

**तिमिङ्गिलाचार्यः**- किन्तु पर्मिट् न लभ्यते किल?

**कूष्माण्डरायः**- अनुमतिपत्रविषये भवतां का चिन्ता? मन्त्री अहं वदामि किल? यावत् आवश्यकं तावत् मम गोडौनतः नयन्तु।

**ति.आ.**- बहु बहु धन्यवादाः। तर्हि वयं गच्छामः।

**कूष्माण्डरायः**- अस्तु, वयं सम्मानदिने पुनः मिलामः। देवीप्रसाद! व्यवस्थाविषये एतान् सर्वं वदतु। व्यवस्थार्थम् एतस्य धनस्य उपयोगं कुर्वन्तु एते। (धनं देवीप्रसादाय ददाति। निर्गच्छति च।) देवीप्रसादः झटिति ततः किञ्चित् स्वकोषे स्थापयति। अवशिष्टं हस्तेन गृहीत्वा)

भोः, पश्यन्तु, सर्वा व्यवस्था समीचीना भवेत्। फोटो, माला, मैक् इत्यादीनां व्यवस्था सम्यक् भवेत्। सभायां बहवः जनाः भवेयुः। तदर्थं समीपस्थेभ्यः ग्रामेभ्यः जनान् भारवाहकयानैः आनयन्तु। धनविषये काऽपि चिन्ता मास्तु। एतत् धनं स्वीकुर्वन्तु। (धनं ददाति।) अन्यच्च तस्मिन् दिने ममापि एका माला---- मदर्थं माला न विस्मर्तव्या------।

**ति.आ.**- अस्तु, अस्तु। सर्वं कुर्मः। गच्छामः।

☆ ☆ ☆

### नवम-दृश्यम्

('अद्य सायङ्काले कूष्माण्डरायस्य सम्माननम् अस्ति सर्वे आगच्छन्तु' इति घोषणा)

(कूष्माण्डरायः उपविष्टः भवति। गिरीशः आगच्छति।)

**गिरीशः**- नमस्कारः।

**मन्त्री**- आं, किं भोः?

**गिरीशः**- भवन्तः मम कृते एकम् आश्वासनं दत्तवन्तः आसन्।

**मन्त्री**- किमिति?

**गिरीशः**- निर्वाचनानन्तरं भवतः कृते एकम् उद्योगं ददामि इति।

**मन्त्री**- वयं राजकीयपुरुषाः तादृशानि बहूनि आश्वासनानि दद्मः। तत्र किमस्ति?

**गिरीशः**- मह्यम् एकम् 'एस. आई. उद्योगं ददामि' इति भवता उक्तम् आसीत्।

**मन्त्रीः**- परन्तु तत् इदानीं नास्ति। अस्माकं विरोधी आसीत् किल, मण्डूकरायः? सः पक्षान्तरं कृत्वा अस्माकं पक्षम् आगतवान्। तस्य पुत्र्याः पत्युः कृते तम् उद्योगं दत्तवान् अहम्।

**गिरीशः**- तर्हि अन्यम् उद्योगं ददातु।

**मन्त्री**- कोऽपि उद्योगः नास्ति। इदानीं मया गन्तव्यम्। मम इदानीं सम्माननकार्यक्रमः अस्ति।

**गिरीशः**- परन्तु मम का गतिः?

**मन्त्री**- भवतः भगवान् एव गतिः। अथवा अधोगतिः। गच्छतु भोः। (तं पादेन प्रहृत्य अग्रे गच्छति।) (गिरीशः क्रोधेन उत्तिष्ठति।)

**गिरीशः**- भोः कूष्माण्डराय! पश्यतु। भवन्तं पाठयामि। शृण्वन्तु भोः! जनाः शृण्वन्तु।

**गीतम्**-

**शृण्वन्तु शृण्वन्तु**
**सर्वेऽपि शृण्वन्तु**
**लोकस्य रीतिरियम्**
**ज्येष्ठानां नीतिरियम्**
**सर्वेऽपि मन्त्रिणः**
**भाषणे चतुराः**
**कार्ये तु अलसाः**
**चौर्ये तु निपुणाःङ्क शृण्वन्तु शृण्वन्तु।**

(जनाः तस्य पृष्ठतः आगच्छन्ति।)

☆ ☆ ☆

**दशम-दृश्यम्**

(मन्त्री भाषणार्थं सन्नद्धः अस्ति। धनङ्गिलाचार्यः हारम् अर्पयति। राङ्कवं चापि अर्पयति। मन्त्री भाषणं करोति।)

**मन्त्री** - भोः, भोः, बान्धवाः,भ्रातरः, भगिन्यः, ज्येष्ठाः---- अहं सम्माननं न इच्छामि। तथापि भवतां सन्तोषार्थम् एतत् अङ्गीकृतवान्। इदानीं मम अधिकारावधौ त्रयः मासाः अतीताः। इदानीं देशे काऽपि समस्या नास्ति। निरुद्योगसमस्या नास्ति। सर्वत्र सुभिक्षः अस्ति। वस्तूनां मूल्यं बहु न्यूनम् अस्ति। सर्वं बहु समीचीनम् अस्ति। (जनाः 'असत्यम्' इति वदन्ति।) कुत्रापि भ्रष्टाचारः एव नास्ति।

**गिरीशः**- सर्वम् असत्यम्। रे वराक! (सर्वे ताडनम् अभिनयन्ति। मन्त्री भयम् अभिनयति।)

**गिरीशः**- भोः, भोः जनाः, पश्यन्तु। एतादृशाः नयवञ्चकाः सर्वत्र सन्ति। एते अस्माभिः एव पोषिताः। अस्माकम् एव रक्तं पिबन्ति। ग्रामे, ग्रामे, नगरे नगरे एतादृशाः सन्ति। एतादृशानां विषये जागरूकाः भवन्तु।

**सर्वे**- ''जागरूको भव।''

☆ ☆ ☆

# अनुशीलन-विस्तरः

**1. बहुविकल्पात्मकाः प्रश्नाः-**

**निर्देशः**-उत्तरानुरूपं समुचितं सङ्केताक्षरं कोष्ठके निवेशनीयमिति।

1. आचार्यभरतेन इदं शास्त्रं प्रणीतम्-
(क) दशरूपकम् (ख) साहित्यदर्पणः
(ग) नाट्यशास्त्रम् (घ) नृत्यशास्त्रम् ( )

2. साहित्यदर्पणस्य रचयिता अयम् अस्ति-
(क) आचार्यभरतः (ख) विश्वनाथः
(ग)शार्ङ्गदेवः (घ) धनञ्जयः ( )

3. आचार्यधनञ्जयेन इदं शास्त्रं विरचितम्-
(क) सङ्गीतरत्नाकरः (ख) आयुर्वेदः
(ग) नाट्यवेदः (घ) दशरूपकम् ( )

4. नाटकस्य शास्त्रीयं नाम किम्?
(क) नर्त्तनम् (ख) रूपकम्
(ग) ईहामृगः (घ) निरूपणम् ( )

5. नाट्यस्य कति भेदाः प्रसिध्यन्ति?
(क) पञ्च (ख) दश
(ग) पञ्चदश (घ) विंशतिः ( )

6. अभिनयः कतिविधः प्रोक्तः?
(क) सप्तविधः (ख) पञ्चविधः
(ग) त्रिविधः (घ) चतुर्विधः ( )

7. वीथीनाटकस्य कृते हिन्द्यां पदम् इदं प्रयुज्यते-
(क) ग्रामनाटक (ख) सङ्कनाटक
(ग) नुक्कड़नाटक (घ) नौटंकी ( )

8. 'जागरूको भव' इति किम्प्रकारकं नाटकम्?
(क) शास्त्रीयनाटकम् (ख) नृत्यनाटकम्
(ग) गीतनाटकम् (घ) वीथीनाटकम् ( )

9. 'जागरूको भव' इत्यस्मिन् नाटके नायकः कः?
(क) कूष्माण्डरायः (ख) कर्मठरायः
(ग) तिमिङ्गिलाचार्यः (घ) गिरीशः ( )

1`. गिरीशस्य पिता कः?
(क) रमेशः (ख) देवीप्रसादः
(ग) कर्मठरायः (घ) धनङ्गिलाचार्यः ( )

11. गिरीशः कां परीक्षाम् उत्तीर्णवान्?

(क)एम. ए. (ख)एम. बी. बी. एस.

(ग)एम.लिब. (घ) एम. टेक. ( )

12. देवीप्रसादः कर्मठरायस्य को विद्यते?

(क) अग्रजः (ख) बाल्यमित्रम्

(ग) अनुजः (घ) प्रतिवेशी ( )

13. गिरीशः देवीप्रसादम् उपगत्य किम् अपेक्षते?

(क) उद्योगम् (ख) धनम्

(ग) मन्त्रिपदम् (घ) पारितोषिकम् ( )

14. देवीप्रसादः कस्मिन् कर्मणि गिरीशं नियोजयति?

(क) सम्मानकर्मणि (ख) प्रचारकर्मणि

(ग) कलहकर्मणि (घ) शान्तिकर्मणि ( )

15. देवीप्रसादः कस्य समर्थनं करोति?

(क) मण्डूकरायस्य (ख) कर्मठरायस्य

(ग) कूष्माण्डरायस्य (घ) गिरीशरायस्य ( )

16. कूष्माण्डरायस्य प्रतिपक्षी को वर्त्तते?

(क) कर्मठरायः (ख) मण्डूकरायः

(ग) गिरीशरायः (घ) धनङ्गिलाचार्यः ( )

17. मण्डूकरायस्य निर्वाचनचिह्नम् एतद् विद्यते-

(क) अजः (ख) गजः

(ग) कपिः (घ) गर्दभः ( )

18. कूष्माण्डरायस्य निर्वाचनचिह्नम् एतद् विद्यते-

(क) सर्पः (ख) दर्पः

(ग) गर्दभः (घ) कपिः ( )

19. मण्डूकरायस्य कः पक्षः?

(क) सुबुद्धिपक्षः (ख) दुर्बुद्धिपक्षः

(ग) प्रबुद्धिपक्षः (घ) निर्बुद्धिपक्षः ( )

2`. कूष्माण्डरायस्य अयं पक्षो वर्त्तते-

(क) निर्बुद्धिपक्षः (ख) अपबुद्धिपक्षः

(ग) सम्बुद्धिपक्षः (घ) दुर्बुद्धिपक्षः ( )

21. निर्वाचनसङ्ग्रामे को विजेता नेता?

(क) कूष्माण्डरायः (ख) मण्डूकरायः

(ग) अखण्डरायः (घ) प्रचण्डरायः ( )

22. देवालयस्य उद्धारार्थं कः कूष्माण्डरायम् उपगच्छति?

(क) अर्चकः (ख) नर्तकः

(ग) देवीप्रसादः (घ) गिरीशः ( )

23. देवीप्रसादेन का प्रसिद्धनटी उल्लिखिता?

(क) श्रीदेवी (ख) जयाप्रदा

(ग) हेममालिनी (घ) ऐश्वर्याराय ( )

24. तिमिङ्गिलाचार्यस्य समितिः का?

(क) परमार्थसाधक-समितिः (ख) स्वार्थसाधक-समितिः

(ग) सर्वार्थसाधक-समितिः (घ) श्वार्थसाधक-समितिः ( )

25. धनङ्गिलाचार्यः स्वसमितेः को वर्त्तते?

(क)अध्यक्षः (ख) कार्यदर्शी

(ग) सूक्ष्मदर्शी (घ) दूरदर्शी ( )

26. तिमिङ्गलाचार्यः कूष्माण्डरायात् किम् अपेक्षते?

(क) उपहारम् (ख) लौहसामग्रीम्

(ग) सीमेण्ट् (घ) काष्ठसज्जाम् ( )

27. कूष्माण्डरायस्य (मन्त्रिणः) भर्त्सनां कः करोति?

(क) कर्मठरायः (ख) गिरीशरायः

(ग) देवीप्रसादः (घ) धनङ्गिलाचार्यः ( )

**लघूत्तरात्मकाः प्रश्नाः-**

1. प्रस्तुतवीथीनाटके कीदृशं संस्कृतं प्रयुक्तम्?
2. कर्मठरायस्य गृहस्थितिः कीदृशी वर्त्तते?
3. कर्मठरायस्य गृहे किं किं वस्तु नास्ति?
4. गिरीशस्य मित्रं को वर्त्तते?
5. गिरीशः स्वमित्रं कुत्र पश्यति? कुत्र च काफी पिबति?
6. गिरीशस्य शैक्षिकयोग्यता कियती वर्त्तते?
7. केन प्रयोजनेन गिरीशो देवीप्रसादम् उपगच्छति?
8. मण्डूकरायस्य पक्षं सङ्केतं च निर्दिशत।
9. कूष्माण्डरायस्य पक्षं सङ्केतं च निर्दिशत।

1`. कूष्माण्डरायो विजित्य किं पदम् आप्नोति?

11. अर्चकः किमर्थं मन्त्रिणः पार्श्वे आयाति?
12. तिमिङ्गिलाचार्यः किमर्थं मन्त्रिणम् उपगच्छति?
13. तिमिङ्गलाचार्यस्य समितेः किं नाम?
14. तिमिङ्गलाचार्यः कस्य निर्माणार्थं सीमेण्ट् अपेक्षते?
15. मन्त्री कस्मिन् कार्यक्रमे सहर्षं स्वीकृतिं प्रददाति?
16. गिरीशस्य कृते सङ्कल्पितम् उद्योगं मन्त्री कस्य कृते ददाति?
17. पुनः पुनः अनुनयं कुर्वन्तं गिरीशं प्रति मन्त्री किं व्यवहरति?
18. तिरस्कारम् अवाप्य गिरीशः मन्त्रिणं प्रति किम् आचरति?

**3. निबन्धात्मकाः प्रश्नाः-**

**निर्देशः**- दशवाक्यप्रायम् उत्तरं प्रतिप्रश्नं प्रदातव्यम् इति।

1. वीथीनाटकस्वरूपविषये स्वविचारान् प्रकटयत।
2. शास्त्रेषु नाट्यं कतिविधं स्मृतम्? नामानि गणयत।
3. 'जागरूको भव' इति नाटकस्य मूलम् उद्देश्यं स्पष्टयत।
4. वीथीनाटकेऽस्मिन् पात्राणां नामकरणे यदि काचिद् विशेषता वर्त्तते तर्हि तां स्पष्टीकुरुत।
5. कूष्माण्डरायस्य चरित्रं कीदृशमिति वर्णयत।
6. गिरीशस्य चरित्रं वर्णनीयम्।
7. देवीप्रसादस्य व्यक्तित्वं स्वशब्दैः प्रकटयत।
8. 'जागरूको भव' इति वीथीनाटकस्य सारांशं लिखत।

# वीथीनाटकस्य दृश्यानुसारं कथा-सारांशः

## प्रथमं दृश्यम्

प्रथमदृश्यस्य प्रारम्भे नाटककारो वीथीनाटकं द्रष्टुं जनान् आह्वयति। तत्कथनं श्रुत्वा समागतः कश्चन लौकिकः संस्कृतभाषायाः काठिन्यं शङ्कमानः तन्माध्यमेन अभिनीयमानस्य वीथीनाटकस्य सामान्यजनैः दुरवबोध्यतां प्रतिपादयति। नाटककारः तस्य शङ्कां निवारयन् वदति यत् नाटकं सरलभाषया भवति। सर्वेषाम् अर्थबोधः भवति। तदुत्तरेण सन्तुष्टो लौकिकः अन्यान् लौकिकानपि संस्कृतवीथीनाटकदर्शनार्थम् आह्वयति।

## द्वितीयं दृश्यम्

द्वितीयदृश्यस्य प्रारम्भो नटैर्गीयमानेन 'रायः गृहमागतः' इत्यनेन गीतेन भवति। रायः गीतानुगुणम् अभिनयति। गीते च अल्पायस्य जनस्य कुटुम्बभरणं कियत् कष्टकारि वर्तते इति वर्ण्यते। गीतसमाप्तौ रायः स्वगृहद्वारं ताडयति। तत्पुत्रः गिरीशः द्वारमुद्घाटयति। रायेण स्वमातुर्विषये पृष्टो गिरीशो वदति यत् सा तु संस्कृतनाटकदर्शनार्थम् अगच्छत्। तदा रायः तमेव कॉफी-पेयम् आनेतुं वदति। कॉफी-स्थाने उष्णजलं प्राप्य रायः उद्विग्नो भवति। गिरीशः गृहे दुग्ध-शर्करा-कॉफीचूर्णदीनाम् अभावं प्रकाशयति। तदुत्तरं श्रुत्वा रायः वदति-सर्वदा नास्ति-नास्ति---नास्ति। किं किं नास्ति इति वदतु। सर्वम् आनयामि। गिरीशः गृहे अविद्यमानानां वस्तूनां सुदीर्घां सूचीं प्रस्तौति। रायः ततः शिरोवेदनाम् अनुभवति पृच्छति गृहे किमस्ति तत् वदतु। गिरीशः वदति अहम् एकः, भवान् एकः, तावदेव। तदा रायः खेदमनुभवन् वदति- अस्तु स्यूतम् आनयतु। सर्वाणि वस्तूनि आनयामि। तदानीमेव रायः किञ्चित् स्मृत्वा गिरीशं तस्य साक्षात्कारविषये पृच्छति। तस्य विफलतां, उद्योगप्राप्तये धनस्य प्रभावस्य च अनिवार्यतां ज्ञात्वा सः गिरीशं स्वस्नेहितस्य देवीप्रसादस्य समीपं गन्तुं वदति। तदनुसारं देवीप्रसादः राजकीयव्यवहारे अतीव निपुणः अस्ति। तत्साहाय्येन उद्योगप्राप्तिः सुनिश्चिता एव। गिरीशः तदानीमेव देवीप्रसादसमीपं गच्छति रायश्च आपणं गच्छति।

## तृतीयं दृश्यम्

रायः आपणं गच्छति। मार्गे तस्य मित्रं रमेशः मिलति। तौ कॉफीपानार्थम् उपाहारमन्दिरं प्रविशतः। वितारकेन आनीते कॉफीपेये मक्षिकां दृष्ट्वा रायरमेशौ क्रुद्धौ भवतः। ताभ्याम् आहूतः वितारकः वदति-यत् मक्षिकां बहिः क्षिपतु। चायं पिबतु। रायः तत् अस्वीकृत्य अन्यत् कॉफी आनेतुं वदति। तदा वितारकः उपहासपूर्वकम् अन्यत् कॉफी-आनयनं निषेधयति। क्रुद्धो रायः स्वास्थ्यविभागाधिकारिणः समीपं गत्वा सर्वं वृत्तान्तं प्रकटयितुं वदति। तदापि वितारकः निःशङ्कतया वदति- यत् स्वास्थ्यसचिव-समीपं गत्वा सर्वं विषयं वदतु। अस्माकं भीतिः नास्ति यतो हि स आगच्छति चेत् मसालादोसा, स्पेषल्-कॉफी च तेभ्यः दास्यामः। ते च मौनं प्रतिगमिष्यन्ति। एतादृशं कथनं श्रुत्वा क्रुद्धो रायः- अस्तु, वयम् अपि पश्याम तावत्-इति कथयन् स्वमित्रेण रमेशेन सह गच्छति।

## चतुर्थं दृश्यं

गिरीशः देवीप्रसादस्य समीपं गच्छति। परिचयसम्भाषणे देवीसहायः वदति यत् इदानीम् अहं सचिवस्य साहाय्यकः अस्मि। अतः सर्वे कमपि सम्बन्धं योजयन्तः एव मत्समीपम् आगच्छन्ति। गिरीशेन स्वमित्रविषये स्मारितो देवीप्रसादः तस्य योग्यतां निरुद्योगसमस्यां च ज्ञात्वा वदति यत् सम्प्रति धनं विना उद्योगप्राप्तिः असम्भवा एव। सः विभिन्नविभागेषु उद्योगं प्राप्तुं निश्चितम् उत्कोचराशिमपि ज्ञापयति। निर्धनः गिरीशः धनदानविषये स्वविवशतां प्रकटयति। तदानीमेव दूरवाण्या मध्यावधिनिर्वाचनस्य सूचनां ज्ञातवान् देवीप्रसादः गिरीशं स्वदलस्य प्रचारार्थं प्रेरयति तदर्थम् उद्योगविषये निर्वाचनानन्तरं विचारयितुम् आश्वासनं च ददाति। गिरीशेन प्रस्तावे स्वीकृते सः गिरीशस्य मस्तके शिरस्त्रं धारयित्वा राजकीयदीक्षां ददाति। उभौ गच्छतः।

## पञ्चमं दृश्यम्

पञ्चमदृश्ये जनाः स्व-स्वदलस्य प्रचारं कुर्वन्ति। आकाशवाण्याः वार्ताप्रसारः भवति यत् गतदिवसे प्रवृत्ते निर्वाचने निर्बुद्धिपक्षस्य श्रीकूष्माण्डरायः विजयी अभवत्। तत्समर्थकाः जयघोषं कुर्वन्ति।

## षष्ठं दृश्यम्

षष्ठे दृश्ये देवीप्रसादः सूचयति यत् इदानीम् अस्माकं नायकः श्रीकूष्माण्डरायः एकम् अमूल्यं भाषणं करोति। कूष्माण्डरायः स्वभाषणे वदति यत् अहं जनानां सेवां कर्तुमेव मन्त्रिपदम् अधितिष्ठामि, भवतां सहयोगेन च शीघ्रमेव मुख्यमन्त्रिपदम् अपि अधिकरिष्यामि। तदा सर्वाः समस्याः दूरीकरिष्यामि। मार्गे सर्वत्र मधुशालाः चित्रमन्दिराणि च स्थापयिष्यामि। अस्माकं राज्यं रामराज्यं भविष्यति, इति।

## सप्तमं दृश्यम्

सप्तमे दृश्ये मन्त्री कूष्माण्डरायः उपविष्टः अस्ति। स्वग्रामस्थ-देवालयस्य जीर्णोद्धारार्थं साहाय्यम् इच्छन्तौ अर्चकः सहकारी च तत्समीपम् आगच्छतः। सहायतार्थं निवेदितः मन्त्री कूष्माण्डरायः-सर्वकारकोषे धनं नास्तीति कथयित्वा तयोः प्रार्थनाम् न स्वीकरोति। पुनश्च ताभ्यां सिमेण्ट्-प्राप्त्यर्थम् अनुमतिपत्रार्थं प्रार्थना क्रियते। मन्त्री तामपि निराकरोति। पुनश्च यथाकथं जनसहयोगेन कृतजीर्णोद्धारस्य देवालयस्य पुनःप्रतिष्ठापनदिवसे मन्त्रिमहोदयः ग्रामे उपस्थितो भवितुं शक्नोति वा? इति पृष्टे मन्त्रिसचिवः देवीसहायः कार्यक्रमपुस्तिकां दृष्ट्वा वदति यत् तद्दिने प्रसिद्धनट्याः हेममालिन्याः सम्माननकार्यक्रमः अस्ति। तदा मन्त्री वदति यत् तस्मिन् कार्यक्रमे अहमेव अध्यक्षः अस्मि। अतः तस्मिन् दिने अहं भवतः ग्रामम् आगन्तुं न शक्नोमि। मन्त्रिणः व्यवहारं दृष्ट्वा शुष्कोत्तरं च श्रुत्वा निराशौ अर्चकौ निर्गच्छतः।

## अष्टमं दृश्यम्

मन्त्री कूष्माण्डरायः उपविशति। कस्याश्चित् शालायाः प्रबन्धकसमित्याः अध्यक्षः कार्यदर्शी च प्रविशतः। तौ स्वग्रामे शालानिर्माणार्थम् अनुदानधनं याचेते। मन्त्रिमहोदयस्तु-गतसर्वकारेण सर्वं धनं व्ययितम्, इति कथयन् धनदानस्य निषेधम् अकरोत्। पुनश्च सिमेण्ट्-दानविषये अपि मन्त्रिणः निषेधात्मकम् उत्तरं श्रुत्वा निराशः शालाध्यक्षः तस्य औदार्यं प्रशंसयन् किञ्चित् साहाय्यं याचते, मन्त्रिणः कथनानुसारञ्च एकं प्रार्थनापत्रं दत्त्वा स्वसहयोगिना सह गच्छति। मन्त्रिणा सङ्केतितः देवीप्रसादः प्रार्थनापत्रम् अपठित्वा एव विदारयति क्षिपति च।

## नवमं दृश्यम्

मन्त्री कूष्माण्डराय: उपविष्ट: अस्ति। स्वार्थसाधकसमिते: कार्यदर्शी धनङ्गिलाचार्य: अध्यक्ष: तिमिङ्गिलाचार्यश्च आगच्छत:। तौ दृष्ट्वा मन्त्री अतीव प्रसन्न: भवति तयो: कुशलं च पृच्छति। यदा अध्यक्ष: वदति यत् वयं भवत: सम्माननं कर्त्तुम् इच्छाम:, तदा कूष्माण्डराय: शीघ्रं देवीसहायम् आहूय एनं विषयं कार्यक्रमपुस्तके लेखितुं वदति। देवीप्रसाद: कार्यक्रमपुस्तकं दृष्ट्वा वदति यत् तस्मिन् दिने भवता कस्याश्चित् शालाया: उद्घाटनम् अङ्गीकृतम् अस्ति। सम्मानलोलुप: मन्त्री तत्कार्यक्रमं व्याक्षिप्य - 'एतं सम्माननकार्यक्रमं पुस्तके लिखतु' इति निर्दिशति। पुनश्च ताभ्यां स्वग्रामे चलचित्राभावे निवेदिते मन्त्री खेदं प्रकटयति सिमेण्ट्-अभावं ज्ञात्वा च सद्य: पञ्चसहस्रगोणीपरिमितं सिमेण्ट् स्वगोडौनत: स्वीकर्त्तुम् अनुमतिं ददाति। सहैव च चलचित्रमन्दिरस्य उद्घाटनार्थमपि अहमेव आगमिष्यामि इति उद्घोषयति। अन्ते च स्वसम्माननकार्यक्रमस्य सुचारुव्यवस्थार्थं प्रभूतं धनमपि देवीप्रसादहस्ते कृत्वा ताभ्यां दातुं निर्दिशति बहिर्गच्छति च। देवीप्रसादोऽपि तत: किञ्चित् धनं स्वकोषे निधाय अवशिष्टं धनम् अध्यक्षाय कार्यदर्शिने च ददाति तथा मालादीनां व्यवस्थार्थं निर्दिश्य सभायां बहूनां जनानां व्यवस्था करणीया इत्यपि बोधयति। अस्मिन् प्रसङ्गे स: आत्मन: कृते माला-आरक्षणमपि कारयति। तौ उभावपि सर्वमङ्गीकृत्य प्रसन्नतामनुभवन्तौ निर्गच्छत:।

## दशमं दृश्यम्

दशमस्य दृश्यस्य प्रारम्भे कूष्माण्डरायस्य सम्माननकार्यक्रमस्य विषये सार्वजनिक-घोषणा श्रूयते। कूष्माण्डराय: उपविष्ट: अस्ति। गिरीश: आगत्य नमस्कारं करोति तथा मन्त्रिणम् उद्योगदानविषयकम् आश्वासनं स्मारयति। मन्त्री तु 'कोऽपि उद्योग: नास्ति' इति कथयन् सम्माननकार्यक्रमार्थं प्रस्थानं करोति। गिरीशेण-मम का गति:? इति पृष्टे- भवत: भगवान् एव गति:। अथवा अधोगति: इति कथयन् तं पादेन प्रहृत्य अग्रे गच्छति। अनेनापमानेन क्षुब्ध: स्वाभिमानी गिरीश: क्रोधेन वदति- भो: कूष्माण्डराय ! भवन्तं पाठयामि। अनन्तरं गिरीश: जनान् उद्दिश्य वदति यत् एते मन्त्रिण: भाषणे तथा चौर्ये तु निपुणा: सन्ति किन्तु कार्ये अलसा: सन्ति। एते स्वार्थिन: अस्माभि: शिक्षणीया: इति। तत: स्वसम्माननानन्तरं मञ्चस्थ: मन्त्री भाषणं करोति। स: स्वभाषणे स्वशासनं प्रशंसन् वदति यत् इदानीं देशे काऽपि समस्या नास्ति। सर्वं बहु समीचीनम् अस्ति। कुत्रापि भ्रष्टाचार: नास्ति। क्रुद्धा: जना:- 'असत्यम्' 'असत्यम्' इति वदन्ति। गिरीशेन प्रेरिताश्च सर्वे मन्त्रिणं ताडयन्ति। मन्त्री च भयमनुभवति। तदा गिरीश: जनानुद्दिश्य वदति यत् एतादृशा: भ्रष्टनेतार: नयवञ्चका: वा सर्वत्र सन्ति। अस्माभि: पोषिता: एते अस्माकम् एव रक्तं पिबन्ति। एतादृशानां धूर्तानां विषये सर्वे जागरूका: भवन्तु। पुनश्च सर्वे एकस्वरेण वदन्ति 'जागरूको भव' इति।

# चरित्र-चित्रणम्

**1.गिरीशः-**

अस्य वीथीनाटकस्य नायकः अयं गिरीशः एवास्ति। एतस्य अनेकविधं चरित्रं पाठकानां दर्शकानाञ्च पुरतः स्फुटीभवति। गिरीशस्य चरित्रे यानि वैशिष्ट्यानि सन्ति तानि संक्षेपतः निम्नलिखितबिन्दुषु प्रस्तोतुं शक्यन्ते।

**1. सुशिक्षितः-** गिरीशः एकः शिक्षितः उद्योगरहितश्च युवकः अस्ति। सः निर्धनस्य कर्मठरायस्य पुत्रः अस्ति तथापि सः महता परिश्रमेण विद्याध्ययनं कृत्वा स्नातकोत्तरपरीक्षायां प्रथमश्रेणीम् अलभत स्वर्णपदकेन च सभाजितः।

**2. निरुद्योगः** - पर्याप्तां शिक्षाम् अधिगत्यापि गिरीशः कुत्रचिदपि उद्योगं न प्राप्तवान्। अत्रापि अधुनातन-सामाजिक-व्यवस्थायाः एव दोषः, अत्र अयोग्याः राजनीतिक-प्रभावेण धनेन (उत्कोचेन) च उद्योगं लभन्ते। योग्याः शिक्षिताः युवानः निर्वृत्तिकाः एव भ्रमन्ति। एतदेव कारणं यदत्र उच्चशिक्षा-सम्पन्नः गिरीशः उद्योगहीनः एव अवर्तत।

**3. समाज-पीडितः-** समाजेन, दोषपूर्णया सामाजिक-व्यवस्थया च अयं पीडितः अभवत्। स्वपितुः कर्मठरायस्य निर्देशानुसारं सः राजनीतिनिपुणस्य देवीप्रसादस्य समीपम् उद्योगप्राप्त्यर्थं गच्छति। किन्तु सः न केवलम् अस्य उपेक्षाम् एव करोति अपितु उद्योगं प्रदातुम् उत्कोच-धनम् अपि याचते। एषः वराकः धनं कुतो वा दद्यात्? विवशः एषः देवीप्रसादस्य कथनानुसारं कूष्माण्डरायस्य उद्योगं दापयामि इति वचने विश्वासं कृत्वा निर्वाचनसमये तस्य पक्षे प्रचारं करोति। निर्वाचने तस्य पक्षस्य विजयः भवति, किन्तु सः स्ववचनानुसारं गिरीशाय उद्योगं न दापयति। गिरीशः यदा तस्य वचनं स्मारयति तदा सः निषेधं करोति। सतिरस्कारं गिरीशं पादप्राहरेण ताडयति च।

**4. क्रान्तिकारी-** उपर्युक्तप्रकारेण राजनैतिक-सामाजिक -व्यवस्थया प्रताडितः गिरीशः समाजे परिवर्तनम् आनेतुं बद्धपरिकरः भवति। यद्यपि सः स्वयं तादृशैः धूर्त्तैः राजनेतृभिः वञ्चितः अभवत्, किन्तु अन्ये जनाः (युवकाः) सामान्याश्च सामाजिकाः जनाः यथा वञ्चिताः, न भवेयुः तादृशं किमपि कर्तुं मनसि निश्चिनोति, तथैव आचरति च। यदा मन्त्रिपदे अभिषिक्तः धूर्त्तः कूष्माण्डरायः सभायां भाषमाणः आसीत्- तदा सर्वेषां जनानां पुरतः एव तस्य वास्तविकं स्वरूपम् उद्घाटयति। सर्वे जनाश्चापि जागरूकाः भवन्ति।

इत्थम् अस्मिन् नाटके अयं गिरीशः एव वस्तुतः समाजे जागृतिम् आनेतुम् अग्रणीः भवति।

**2. देवीप्रसादः-**

देवीप्रसादः अत्र नाटके सचिवस्य साहाय्यकरूपेण कार्यं करोति। अयम् एतस्य वीथीनाटकस्य उद्देश्यं साधयितुं गिरीशानन्तरं द्वितीय-स्थाने विराजमानः दृश्यते। अस्माकं समाजे धूर्त्तानां वर्चस्वं स्थापितं वर्तते इति, देवीप्रसादः एव प्रत्यक्षं प्रदर्शयति। एतस्य चरित्रे अनेकविध-वैशिष्ट्यानि अवलोक्यन्ते।

देवीप्रसादः आधुनिक-राजनीतिं सम्यक् जानाति। तदनुगुणं च आचरणम् अपि करोति। यथा स्वबाल्यमित्र-कर्मठरायविषये कथितः सन् वदति- 'इदानीम् अहं सचिवस्य साहाय्यकः अस्मि। अतः सर्वे 'भवतः मित्रस्य पुत्रः', पुनः, 'भवतः मित्रस्य मित्रम्', 'भवतः मित्रस्य सहोदरः', इत्येवं वदन्तः मत्समीपम् आगच्छन्ति' इति। एवं सः परिचितम् अपि न परिचिनोति। किन्तु स्वार्थसाधने सः अतीव निपुणः दृश्यते। सः स्वमित्रस्य पुत्रादपि उत्कोचधनस्वीकारे संकोचं न कुरुते।

स्वयं तु एषः गिरीशस्य कृते किमपि न करोति किन्तु उद्योगप्रदानात्मकं मिथ्याश्वासनं दत्त्वा

प्रचारकर्मणि तं नियोजयति। निर्वाचने स्वपक्षस्य विजयानन्तरं दत्तं वचनं सर्वथा विस्मरति। मन्त्रिण: कूष्माण्डरायस्य अनुचितकृत्येषु एष: सर्वदा साहाय्यम् आचरति। सम्मानकार्यक्रमे व्यवस्थार्थं प्रदत्तधनादपि किञ्चिद् धनं स्वपुटके स्थापयति। स्वयं च सम्मानाभिलाषी वर्त्तते। इत्थम् अयं देवीप्रसाद: सर्वविधधूर्त्तचरितम् चरितार्थयति।

**3. कूष्माण्डराय:-**

कूष्माण्डराय: एक: स्वार्थी सत्तालोलुप: विदूषकस्वभावश्च राजनेता विद्यते। अस्य नाम्नि भाषणे चापि मनोरञ्जनबीजं सर्वत्र प्राप्यते। अयं निर्बुद्धिपक्षस्य गर्दभसङ्केतम् अङ्गीकृत्य निर्वाचने विजेता भवति मन्त्रिपदञ्च प्राप्नोति। स मन्त्री भूत्वा स्वप्रदत्तानि वचनानि विस्मरति परिचितान् चापि न परिचिनोति। स: केवलं स्वार्थमेव सर्वदा स्मरति। वस्तुत: स: भ्रष्टराजनेतृणां प्रातिनिध्यं करोति ये स्वार्थैकलक्ष्या: सन्त: स्वनिर्वाचकान् जनान् अपि उपेक्षन्ते। स: देवालयस्य विद्यालयस्य च कृते अनुदानधनं सीमेण्ट् चापि न ददाति तयो: उद्घाटनार्थमपि च सिद्धो न भवति परन्तु स्वसम्मानकार्यक्रमार्थम् अत्युत्साही दृश्यते। तदर्थम् अविलम्बं स्वीकृतिं धनं चापि ददाति। पुनश्च सम्मानकर्तृणां ग्रामे चलचित्रमन्दिर-निर्माणार्थं पञ्चसहस्रगोणीपरिमितं सीमेण्ट् अपि स्वगोडौनत: सहर्षं ददाति। अनेनास्य स्वार्थपरता, विवेकशून्यता, सम्मानलोलुपता एवञ्च स्वगोडोनमध्ये पर्याप्त-सीमेण्ट्-संग्रहेण तस्य व्यावसायिकं चातुर्यमपि प्रकटीभवति। कूष्माण्डराय: एक: अवसरवादी राजनेता वर्तते। स: स्वनिर्वाचने साहाय्यमाचरितवते गिरीशाय उद्योगदानविषये पूर्व- दत्तम् आश्वासनं न पूरयति तं पादेन प्रहृत्य च स्वसम्माननकार्यक्रमार्थं प्रस्थानं करोति। स: भाषणे अतीव चतुर: अस्ति। स्वभाषणेन जनान् आत्मनो वशे करोति। किन्तु अन्ते तस्य सर्वा चतुरता निष्फला भवति। गिरीशेन जागरिता: जना: तं ताडयन्ति तथा तेन स्वदुष्टताया: फलं प्राप्यते। कूष्माण्डरायमाध्यमेन अवरसवादिनां स्वार्थिनां विदूषकसदृशानां च राजनेतृणां चरित्र-चित्रणम् अस्मिन् वीथीनाटके सञ्जातमिति वक्तुं शक्यते।

★ ★ ★